শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৮৩

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮৩

*পৌণ্ড্রকৱধৱর্ণনং কাশীপুরিদাহৱর্ণনং*
*দ্বিৱিদৱধৱর্ণনং লক্ষণাস্বযংৱরং চ*

রামেথ গোকুলগতে প্রমদাপ্রসক্তে
 হূতানুপেতযমুনাদমনে মদান্ধে।
স্বৈরং সমারমতি সেৱকৱাদমূঢো
 দূতং ন্যযুঙ্ক্ত তৱ পৌণ্ড্রকৱাসুদেৱঃ॥ ১ ॥

নারাযণোহমৱতীর্ণ ইহাস্মি ভূমৌ
 ধৎসে কিল ত্বমপি মামকলক্ষণানি।
উৎসৃজ্য তানি শরণং ৱ্রজ মামিতি ত্বাং
 দূতো জগাদ সকলৈর্হসিতঃ সভাযাম্॥ ২ ॥

দূতেথ যাতৱতি যাদৱসৈনিকৈস্ত্ৱং
 যাতো দদর্শিথ ৱপুঃ কিল পৌণ্ড্রকীযম্।
তাপেন ৱক্ষসি কৃতাঙ্কমনল্পমূল্য-
 শ্রীকৌস্তুভং মকরকুণ্ডলপীতচেলম্॥ ৩ ॥

কালাযসং নিজসুদর্শনমস্যতোস্য
 কালানলোৎকরকিরেণ সুদর্শনেন।
শীর্ষং চকর্তিথ মমর্দিথ চাস্য সেনাং
 তন্মিত্রকাশিপশিরোপি চকর্থ কাশ্যাম্॥ ৪ ॥

জাল্যেন বালকগিরাপি কিলাহমেৱ
 শ্রীৱাসুদেৱ ইতি রূঢমতিশ্চিরং সঃ।
সাযুজ্যমেৱ ভৱদৈক্যধিযা গতোভূৎ
 কো নাম কস্য সুকৃতং কথমিত্যৱেযাৎ॥ ৫ ॥

কাশীশ্বরস্য তনযোথ সুদক্ষিণাখ্যঃ
শৰ্বং প্ৰপূজ্য ভৱতে ৱিহিতাভিচারঃ।
কৃত্যানলং কমপি বাণরণাতিভীতৈ-
র্ভূতৈঃ কথঞ্চন ৱৃতৈঃ সমমভ্যমুঞ্চত্॥ ৬॥

তালপ্ৰমাণচরণামখিলং দহন্তীং
কৃত্যাং ৱিলোক্য চকিতৈঃ কথিতোপি পৌরৈঃ।
দ্যূতোতসৱে কিমপি নো চলিতো ৱিভো ত্বং
পাৰ্শ্বস্থমাশু ৱিসসৰ্জিথ কালচক্ৰম্॥ ৭॥

অভ্যাপতত্যমিতধাম্নি ভৱন্মহাস্ত্ৰে
হা হেতি ৱিদ্ৰুতৱতী খলু ঘোরকৃত্যা।
রোষাত্ সুদক্ষিণমদক্ষিণচেষ্টিতং তং
পুপ্লোষ চক্ৰমপি কাশিপুরীমধাক্ষীত্॥ ৮॥

স খলু ৱিৱিদো রক্ষোঘাতে কৃতোপকৃতিঃ পুরা
তৱ তু কলযা মৃত্যুং প্ৰাপ্তুং তদা খলতাং গতঃ।
নরকসচিৱো দেশক্লেশং সৃজন্ নগরান্তিকে
ঝটিতি হলিনা যুধ্যন্নদ্ধা পপাত তলাহতঃ॥ ৯॥

সাম্বং কৌরৱ্যপুত্ৰীহরণ নিযমিতং সান্ত্বনাৰ্থী কুরূণাং
যাতস্তদ্বাক্যরোষোদধৃতকরিনগরো মোচযামাস রামঃ।
তে ঘাত্যাঃ পাণ্ডৱেযৈরিতি যদুপৃতনাং নামুচস্তৱং তদানীং
তং ত্বাং দুৰ্বোধলীলং পৱনপুরপতে তাপশান্ত্যৈ নিষেৱে॥ ১০॥

**********